International Journal of Sanskrit Research 2020; 6(5): 341-342

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 341-342
© 2020 IJSR
www.anantaajournal.com
Received: 21-07-2020
Accepted: 29-08-2020

**डॉ० संजय कुमार झा**
एम0 ए0 पी0–एच0डी0, नेट,
सहायक शिक्षक, रा0 उ0 वि0,
सिंघाड़ा, महुआ, वैशाली, बिहारए
भारत

**Corresponding Author:**
**डॉ० संजय कुमार झा**
एम0 ए0 पी0–एच0डी0, नेट,
सहायक शिक्षक, रा0 उ0 वि0,
सिंघाड़ा, महुआ, वैशाली, बिहारए
भारत

# मृच्छकटिकम् इति नामकरणं सिद्धांन्तानुसारम्

**डॉ० संजय कुमार झा**

**सारांश**
ग्रन्थस्य नामकरणं स्वस्मिन् निहितं गूढार्थं प्रतिपादकम्। यादृशं नामकरणं तादृषं ग्रन्थलक्षणम्। ग्रन्थस्य नामकरणं तस्मिन् निहितं भावं सुस्पष्टं करोति। अतः ग्रन्थे निहितः भावः तस्य नामकरणेन सह तारतम्यः भवितव्यः अन्यथा नामकरणस्यौचित्यं प्रश्नचिह्नं समुत्थापयति। अतः नामकरणं ग्रन्थस्य पृष्ठभूमौ सुविचारितेन परिकल्पितम्। इंद विषयान्तरं न भवेत् इत्यस्य सर्वदा ध्यायेत्।

**प्रस्तावना**

संस्कृतसाहित्यजगति विद्यमानासु विविधसाहित्यविधासु रूपकं सर्वातिशयि महत्त्वपूर्णं विद्यते। अत्र रूपके चारूदत्तवसन्तसेनयोः प्रणयकथायाः सरसं चित्रणं कृतं, परं तेनैव सह तात्कालिकसमाजस्य चित्रमप्यचिङ्क्षतम्। एतत्प्रकरणगतकथा भागद्वये विभक्ता। प्रथमो भागश्चारूदत्तवसन्तसेनयोः प्रेमकथा अंचिङ्क्षता। द्वितीयश्च भागः आर्यकस्य राज्यप्राप्तिं विवृणोति। अत्ररूपकस्य मृच्छकटिकनामकरणस्य एवं विमर्षः कर्तुषक्यते।

मृच्छकटिक नाम श्रवणसुभगं न प्रतीयते। सामान्येन तु अस्यार्थः बोधगम्यः न भवति। संस्कृतज्ञोऽपि अस्य विच्छेदं कर्तुं ज्ञातुं शक्नोति यत् शब्दोऽयं मृत्+षकटिकम्–अनयोः शब्दयोः मेलनेन विरचितोऽस्ति यस्यार्थः मृद्निर्मितं शकटं यानं भवति। बालकं रोहसेनं प्रसादयितुं वसन्तसेनया स्वर्णाभूषणनि परित्यज्य अस्मिन्नेव प्रक्षिप्ता। अमूं शकटं दृष्ट्वा एव आधिकारणिकोऽपि चारूदत्तस्य अभियोगस्य प्रत्यक्षप्रमाणमलब्धम्। अनेनैव आधिकारिणिकः विनिष्चेतुं समर्थः यतः नूनमेव चारूदत्तेन वसन्तसेना हता। रूपकेऽस्मिन् इयं घटना अतिमहत्वपूर्णा। एतत्कारणात् हि अस्य नामकरणं मृच्छकटिंक जातम्।

मृच्छकटिकस्य पष्ठाङ्के चारूदत्तस्य सेविका रदनिका चरूदत्तपुत्ररोहसेनं क्रीडितुं मृद्निर्मितां शकटिकां ददाति। परं स तं न जिघृक्षति अपि च प्रतिवेषिनः दारकस्य सुवर्णषकटिकां स्वीकर्तुं दुराग्रहं करोति। स कथयति– 'रदनिके। किं ममैतया मृत्तिकाषकटिकया ? तामेव सौवर्णषकटिकां देहि।'[1] वसन्तसेना यतोहि तस्य क्रन्दन हेतुः जानाति तस्यां मातृस्नेहः प्रबलो भवति। सा च वात्सल्यभावेन तत्क्षणमेव स्वर्णभूषणानि परित्यज्य तानि सुवर्णषकटिकां निर्मातुं आज्ञापयति– ''तद्गृहाणै तमलंकारम् सौवर्णषकटिकां कारय।''[2] सा इदृषं केवलं तं प्रसादयितुं करोति।

अत्रायं प्रष्नः स्वाभाविको भवति यत् रूपकेऽ स्मिन् यदा सुवर्णषकटिस्य परिचर्चा जाता तर्हि अस्य नामकरणं 'सुवर्णषकटिकं' कथं न प्रयुक्ता किंवा 'वसन्तसेनाचारूदत्तम्' नाम कथं न समीचीनम् अमन्यत। अस्य उभयोः नाम्नोः परिकल्पनं कर्तुषक्यते परं साहित्यदर्पणस्य पष्ठ परिच्छेदानुसारेण ''नाम कार्य नाटकस्य गर्भितार्थ प्रकाषकम्।''[3] तदनुसारेण नाटकस्य नाम गर्भितार्थं प्रतिपादनीयम्। उपर्युक्ताभ्यां नामकरणाभ्यां अभिप्रायः न पूर्णतां याति यतोहि अस्मिन् अलौकिक गूढार्थः न गुह्योऽस्ति।

सुवर्णषकटिकापेक्षया मृच्छकटिकं भावि असन्तोषस्य व्यापको हेतुरस्ति। एतत् हि नाटकस्य उत्कर्षे सहायकभूतम अस्ति। अनेन दृष्ट्वा मृच्छकटिकं नाम सर्वथा समीचीनम्। व्यवहारदूषणं खलस्वभावः एभ्यां सहैव अस्य कथानकम् उत्तरोत्तरं आकर्षकमुपैति। लौकिक दृष्ट्या असन्तुष्टाः सन्तः जीवनं निर्वहन्तः जनाः प्रायशः इतरेभ्यः असूयन्ति अपि च नानाविध् कष्टापन्नाः भविन्त। सद्गुणेभ्यः आत्मोन्नयनाय यत्नशीलः भवितुं तु वरम् अस्ति, परं अन्येषाम् उत्कर्षम् असोढुं साधु नास्ति। लोके स नरः सुखेन तिष्ठति यः स्वस्मिन् स्थितौ सन्तुष्टः अस्ति अपि च अन्येषां उत्कर्षे हर्षितं अनुभवति। रोहसेनः मृत्तिकया निर्मितेन शकटेन अतुष्टो भूत्वा सुवर्णषकटिकम् इच्छति। अयमेव दोषः यत्कारणेन स न केवलं स्वस्यकृते अपितु पितरेऽपि च बहुविधानि कष्टानि सहते। एवं असन्तोषः तु अस्य नाटकस्य मूलाधारः। अन्येभ्यः पात्रेभ्यष्च इदं सततं प्रवर्तितं संलक्ष्यते। वसन्तसेना शकारापेक्षया चारूदताय स्निह्यति चारूदत्तोऽपि स्वभार्याधूतयाः अपेक्षया वसन्तसेनां प्रेयसीं चिकीर्षिति। अनेन माध्यमेन विवर्द्धमानम् असन्तोषः रूपकस्य कथानकम् उत्साहवर्धकं करोति।

सुवर्णषकटिकापेक्षया मृच्छकटिकं नाम युक्तितरं यतोहि रोहसेनः मृत्निर्मितषकटिकस्य स्थाने सुवर्णषकटिकं जिघृक्षति ततोहि प्रवहण परिवर्तनस्य घटना घटति। वसन्तसेना च चारूदत्तेन प्रेषितं शकटे अनुपविश्य शकारप्रेषितं शकटे उपविश्य तं पार्श्वे अधिगच्छति। इतः प्रारभ्य रूपकस्य स्वरूपं परिवर्तते घटनाक्रमष्च पुरः संलक्षते। अनेन दृष्टिकोणेन रोहसेनस्य मृत्षकटिकं सुवर्णषकटिकेन परिवर्तयिंतु प्रवहण परिवर्तनस्य सूचकं भवति। वस्तुतो नियतिः भाविनाम् इष्टानिष्ट घटनानां सन्देशं ददाति। सामान्येन तु बालकस्य अयं दुराग्रहः लघु घटना प्रतीयते परं रूपकस्य नाम औचित्येन महत्वपूर्णः अस्ति।

## निष्कर्ष

रूपकेऽस्मिन् असन्तोषस्य अतिषय वर्णनम् मृतशकटिकम् तु महत् असंतोषस्य सूचकम्। सामान्यः तु बालकस्य रोहसेनस्य अस्मैकृतः दुराग्रहः एकालघु घटना प्रतीयते परं रूपकस्य औचित्यं कृते महत्त्वपूर्णं जायते। अतः मृत् निर्मितघटनामाश्रित्य रूपकमिदं पूर्णरूपेण समीचीनम्।

## सन्दर्भ सूची

1. मृच्छकटिकम् – षष्ठोऽ्यङ्क॰
2. मृच्छकटिकम् – षष्ठोऽ्यङ्कङ्क॰
3. साहित्यदर्पणः – 6/142